# Ganeshatapini Upanishad Purva and Uttara parts

# ગણેશતાપિન્યુપનિષત્ પૂર્વં ઉત્તરં ચ

## Document Information

Text title : Ganeshatapini Upanishad

File name : gaNeshatApinIupaniShat.itx

Category : upanishhat, ganesha

Location : doc_upanishhat

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : Atharvaveda category

Latest update : April 18, 2015

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 11, 2025

*sanskritdocuments.org*

Ganeshatapini Upanishad Purva and Uttara parts

# ગણેશતાપિન્યુપનિષત્ પૂર્વં ઉત્તરં ચ

અથ ગણેશ પૂર્વતાપિન્યુપનિષત્ ॥
(વરદ પૂર્વતાપિની)
ગણેશં પ્રમથાધીશં નિર્ગુણં સગુણં વિભુમ્ ।
યોગિનો યત્પદં યાન્તિ તં ગૌરીનન્દનં ભજે ॥ ૧॥
ૐ નમો વરદાય વિઘ્નહર્ત્રે ॥ અથાતો બ્રહ્મોપનિષદં
વ્યાખ્યાસ્યામઃ । બ્રહ્મા દેવાનાં સવિતુઃ કવીનામૃષિ-
ર્વિપ્રાણાં મહિષો મૃગાણામ્ । ધાતા વસૂનાં સુરભિઃ
સૃજાનાં નમો બ્રહ્મણેઽથર્વપુત્રાય મીઢુષે ॥ ધાતા
દેવાનાં પ્રથમં હિ ચેતો મનો વનાનીવ મનસાઽઽકલ્પયદ્ધઃ ।
નમો બ્રહ્મણે બ્રહ્મપુત્રાય તુભ્યં જ્યેષ્ઠાયાથર્વપુત્રાય
ધન્વિને ॥ ૧॥

ૐ પ્રજાપતિઃ પ્રજા અસૃજત । તાઃ સૃષ્ટા અબ્રુવન્
કથમન્નાદ્યા અભવન્નિતિ । સ ત્રેધા વ્યભજદ્ભૂર્ભુવઃસ્વરિતિ ।
સ તપોઽતપ્યત । સ બ્રહ્મા સ વિષ્ણુઃ સ શિવઃ સ પ્રજાપતિઃ
સેન્દ્રઃ સોઽગ્નિઃ સમભવત્ । સ તૂષ્ણીં મનસા ધ્યાયન્
કથમિમેઽન્નાદ્યાઃ સ્યુરિતિ । સોઽપશ્યદાત્મનાઽઽત્માનં
ગજરૂપધરં દેવં શશિવર્ણં ચતુર્ભુજં યતો વા ઇમાનિ
ભૂતાનિ જાયન્તે યતો વાયન્તિ યત્રૈવ યન્તિ ચ । તદેતદક્ષરં
પરં બ્રહ્મ । એતસ્માજ્જાયતે પ્રાણો મનઃ સર્વેન્દ્રિયાણિ ચ ।
ખં વાયુરાપો જ્યોતિઃ પૃથિવી વિશ્વસ્ય ધારિણી । પુરુષ
એવેદં તપો બ્રહ્મ પરામૃતમિતિ ॥ ૨॥

સોઽસ્તુવત નમો બ્રહ્મણે નમો બ્રાહ્મણેભ્યો નમો વેદેભ્યો નમ
ઋષિભ્યો નમઃ કુલ્યેભ્યઃ પ્રકુલ્યેભ્યો નમઃ સવિત્રે પ્રસવિત્રે
નમો ભોજ્યાય પ્રકૃષ્ટાય કપર્દિને ચક્રાય ચક્રધરાયા-
ન્નાયાન્નપતયે શિવાય સદાશિવાય તુર્યાય તુરીયાય ભૂ-

ર્ભુવઃસ્વઃપતે રાયસ્પતે વાજિપતે ગોપતે ઋગ્યજુઃસામાથર્વાઙ્-
ગિરઃપતે નમો બ્રહ્મપુત્રાયેતિ ॥ ૩॥

સોઽબ્રવીદ્વરદોઽસ્મ્યહમિતિ । સ પ્રજાપતિરબ્રવીત્કથમિમે-
ન્નાદ્યાઃ સ્યુરિતિ । સ હોવાચ બ્રહ્મપુત્રસ્તપસ્તેપે સિદ્ધક્ષેત્રે
મહાયશાઃ । સ સર્વસ્ય વક્તા સર્વસ્ય જ્ઞાતાસીતિ । સ
હોવાચ તપસ્યન્તં સિદ્ધારણ્યે ભૃગુપુત્રં પૃચ્છધ્વમિતિ ।
તે પ્રત્યાયુયુઃ । સ હોવાચ કિમેતદિતિ । તે હોચુઃ કથં
વયમન્નાદ્યા ભવામ ઇતિ । સ તૂષ્ણીં મનસા ધ્યાયન્
કથમિમેઽન્નાદ્યાઃ સ્યુરિતિ । સ એતમાનુષ્ટુભં
પ્રયન્ત્યભિસંવિશન્તિ । તસ્યૈષા ભવતિ — અનુષ્ટુપ્પ્રથમા
ભવત્યનુષ્ટુબુત્તમા ભવતિ । વાગ્વા અનુષ્ટુબ્વાચૈવ પ્રયન્તિ
વાચૈવોદ્યન્તિ । પરમા વા એષા છન્દસાં યદનુષ્ટુપ્ ।
સર્વમનુષ્ટુપ્ । એતં મન્ત્રરાજં યઃ પશ્યતિ સ પશ્યતિ । સ
ભુક્તિં મુક્તિં ચ વિન્દતિ । તેન સર્વજ્ઞાનં ભવતિ ।
તદેતન્નિદર્શનં ભવતિ — એકો દેવઃ પ્રાપકો યો વસૂનાં
શ્રિયા જુષ્ટઃ સર્વતોભદ્ર એષઃ । માયાદેવો બલગહનો
બ્રહ્મારાતીસ્તં દેવમીડે દક્ષિણાસ્યમ્ ॥ આ તૂ ન ઇન્દ્ર
ક્ષુમન્તં ચિત્રં ગ્રાભં સઙ્ગૃભાય । મહાહસ્તી
દક્ષિણેન ॥ ઇતિ સહસ્રકૃત્વસ્તુષ્ટાવ ॥ ૪॥

અથાપશ્યન્મહાદેવં શ્રિયા જુષ્ટં મદોત્કટમ્ ।
સનકાદિ મહાયોગિવેદવિદ્ભિરુપાસિતમ્ ॥
દ્રુહિણાદિમદેવેશષટ્પદાલિવિરાજિતમ્ ।
લસત્કર્ણં મહાદેવં ગજરૂપધરં શિવમ્ ॥
સ હોવાચ વરદોઽસ્મીતિ । સ તૂષ્ણીં મનસા વવ્રે । સ તથેતિ
હોવાચ । તદેષ શ્લોકઃ — સ સંસ્તુતો દૈવતદેવસૂનુઃ સુતં
ભૃગોર્વાક્યં ઉવાચ તુષ્ટઃ । અવેહિ માં ભાર્ગવ
વક્રતુણ્ડમનાથનાથં ત્રિગુણાત્મકં શિવમ્ ॥ અથ તસ્ય
ષડઙ્ગાનિ પ્રાદુર્બભૂવુઃ । સ હોવાચ જપધ્વમાનુષ્ટુભં
મન્ત્રરાજં ષટ્પદં સષડક્ષરમ્ । ઇતિ યો જપતિ સ ભૂતિમાન્
ભવતીતિ યૂયમન્નાદ્યા ભવેયુરિતિ । તદેતન્નિદર્શનમ્— ગણાનાં
ત્વા ગણનાથં સુરેન્દ્રં કવિં કવીનામતિમેધવિગ્રહમ્ ।

જ્યેષ્ઠરાજં વૃષભં કેતુમેકં સા નઃ શ ૃણ્વન્નૂતિભિઃ
સીદ શાશ્વત્ ॥ ૫॥

તે હોચુઃ કથમાનુષ્ટુભં મન્ત્રરાજમભિજાનીમ ઇતિ । સ
એતમાનુષ્ટુભં ષટ્પદં મન્ત્રરાજં કથયાઞ્ચક્રે । સ
સામ ભવતિ । ઋગ્વૈ ગાયત્રી યજુરુષ્ણિગનુષ્ટુપ્ સામ । સ
આદિત્યો ભવતિ । ઋગ્વૈ વસુર્યજૂ રુદ્રાઃ સામાદિત્યા ઇતિ । સ
ષટ્પદિ ભવતિ । સામ વૈ ષટ્પદઃ । સ સાગરાં સપ્તદ્વીપાં
સપર્વતાં વસુન્ધરાં તત્સામ્નઃ પ્રથમં પાદં જાનીયા-
દ્રાયસ્પોષસ્ય દાતેતિ । તેન સપ્તદ્વીપાધિપો ભવતિ ભૂઃપતિત્વં
ચ ગચ્છતિ । યક્ષગન્ધર્વાપ્સરોગણસેવિતમન્તરિક્ષં
દ્વિતીયં પાદં જાનીયાન્નિધિદાતેતિ । તેન ધનદાદિકાષ્ઠા-
પતિર્ભવતિ ભુવઃપતિત્વં ચ ગચ્છતિ । વસુરુદ્રાદિત્યૈઃ
સર્વૈર્દેવૈઃ સેવિતં દિવં તત્સામ્નસ્તૃતીયં પાદં જાનીયા-
દન્નદો મત ઇતિ । તેન દેવાધિપત્યં સ્વઃપતિત્વં ચ ગચ્છતિ ।
ઋગ્યજુઃસામાથર્વાઙ્ગિરોગણસેવિતં બ્રહ્મલોકં તુર્યં
પાદં જાનીયાદ્રક્ષોહણ ઇતિ । તેન દેવાધિપત્યં
બ્રહ્માધિપત્યં ચ ગચ્છતિ । વાસુદેવાદિચતુર્વ્યૂહસેવિતં
વિષ્ણુલોકં તત્સામ્નઃ પઞ્ચમં પાદં જાનીયાદ્બલગહન ઇતિ ।
તેન સર્વદેવાધિપત્યં વિષ્ણુલોકાધિપત્યં ચ ગચ્છતિ ।
બ્રહ્મસ્વરૂપં નિરઞ્જનં પરમવ્યોમ્નિકં તત્સામ્નઃ ષષ્ઠં
પાદં જાનીયાત્ । તેન વક્રતુણ્ડાય હુમિતિ યો જાનીયાત્-
સોઽમૃતત્વં ચ ગચ્છતિ । સત્યલોકાધિપત્યં ચ ગચ્છતિ ॥ ૬॥

ઋગ્યજુઃસામાથર્વાશ્ચત્વારઃ પાદા ભવન્તિ । રાયસ્પોષસ્ય
દાતા ચેતિ પ્રથમઃ પાદો ભવતિ ઋગ્વૈ પ્રથમઃ પાદઃ ।
નિધિદાતાઽન્નદો મત ઇતિ દ્વિતીયઃ પાદઃ યજુર્વૈ દ્વિતીયઃ પાદઃ ।
રક્ષોહણો વો બલગહન ઇતિ તૃતીયઃ પાદઃ સામ વૈ તૃતીયઃ
પાદઃ । વક્રતુણ્ડાય હુમિતિ ચતુર્થઃ પાદઃ અથર્વશ્ચતુર્થઃ
પાદોઽથર્વશ્ચતુર્થઃ પાદ ઇતિ ॥ ૭॥

ઇતિ ગણેશપૂર્વતાપિન્યુપનિષત્સુ પ્રથમોપનિષત્ ॥ ૧॥

---

સ હોવાચ પ્રજાપતિરગ્નિર્વૈ વેદા ઇદં સર્વં વિશ્વાનિ ભૂતાનિ

વિરાટ્ સ્વરાટ્ સમ્રાટ્ તત્સામ્નઃ પ્રથમં પાદં જાનીયાત્ ।
ઋગ્યજુઃસામાથર્વરૂપઃ સૂર્યોઽન્તરાદિત્યે હિરણ્મયઃ
પુરુષસ્તત્સામ્નો દ્વિતીયં પાદં જાનીયાત્ । ય ઓષધીનાં
પ્રભવિતા તારાપતિઃ સોમસ્તત્સામ્નસ્તૃતીયં પાદં જાનીયાત્ ।
યો બ્રહ્મા તત્સામ્નશ્ચતુર્થં પાદં જાનીયાત્ । યો
હરિસ્તત્સામ્નઃ પઞ્ચમં પાદં જાનીયાત્ । યઃ શિવઃ સ
પરં બ્રહ્મ તત્સામ્નોઽન્ત્યં પાદં જાનીયાત્ । યો જાનીતે
સોઽમૃતત્વં ચ ગચ્છતિ પરં બ્રહ્મૈવ ભવતિ ।
તસ્માદિદમાનુષ્ટુભં સામ યત્ર ક્વચિન્નાચષ્ટે । યદિ
દાતુમપેક્ષતે પુત્રાય શુશ્રૂષવે દાસ્યત્યન્યસ્મૈ શિષ્યાય
વેતિ ॥ ૧॥

તસ્ય હિ ષડઙ્ગાનિ ભવન્તિ — ૐ હૃદયાય નમઃ શિરસે
સ્વાહા શિખાયૈ વષટ્ કવચાય હુમ્ । નેત્રત્રયાય વૌષટ્
અસ્ત્રાય ફડિતિ પ્રથમં પ્રથમેન દ્વિતીયં દ્વિતીયેન તૃતીયં
તૃતીયેન ચતુર્થં ચતુર્થેન પઞ્ચમં પઞ્ચમેન ષષ્ઠં
ષષ્ઠેન પ્રત્યક્ષરમુભયતો માયા લક્ષ્મીશ્ચ ભવતિ ।
માયા વા એષા વૈનાયકી સર્વમિદં સૃજતિ સર્વમિદં રક્ષતિ
સર્વમિદં સંહરતિ તસ્માન્માયામેતાં શક્તિં વેદ । સ
મૃત્યું જયતિ । સ પાપ્માનં તરતિ । સ મહતીં શ્રિયમશ્નુતે ।
સોઽભિવાદી ષટ્કર્મસંસિદ્ધો ભવત્યમૃતત્વં ચ ગચ્છતિ ।
મીમાંસન્તે બ્રહ્મવાદિનો હ્રસ્વા વા દીર્ઘા વા પ્લુતા વેતિ ।
યદિ હ્રસ્વા ભવતિ સર્વપાપ્માનં તરત્યમૃતત્વં ચ
ગચ્છતિ । યદિ દીર્ઘા ભવતિ મહતીંશ્રિયમાપ્નુયાદમૃતત્વં
ચ ગચ્છતિ । તદેતદૃષિણોક્તં નિદર્શનમ્ — સ ઈં પાહિ ય
ઋજીષી તરુત્રઃ સ શ્રિયં લક્ષ્મીમૌપલામ્બિકાં ગામ્ ।
ષષ્ઠીં ચ યામિન્દ્રસેનેત્યુત આહુસ્તાં વિદ્યાં બ્રહ્મયોનિ-
સ્વરૂપામ્ ॥ તામિહાયુષે શરણં પ્રપદ્યે । ક્ષીરોદાર્ણવ-
શાયિનં કલ્પદ્રુમાધઃસ્થિતં વરદં વ્યોમરૂપિણં
પ્રચણ્ડદણ્ડદોર્દણ્ડં વક્રતુણ્ડસ્વરૂપિણં પાર્શ્વાધઃ-
સ્થિતકામધેનું શિવોમાતનયં વિભુમ્ ।
રુક્મામ્બરનિભાકાશં રક્તવર્ણં ચતુર્ભુજમ્ ।

કપર્દિનં શિવં શાન્તં ભક્તાનામભયપ્રદમ્ ॥
ઉન્નતપ્રપદાઙ્ગુષ્ઠં ગૂઢગુલ્ફં સપાર્ષ્ણિકમ્ ।
પીનજઙ્ઘં ગૂઢજાનું સ્થૂલોરું પ્રોન્નમત્કટિમ્ ॥
નિમ્નનાભિં કમ્બુકણ્ઠં લમ્બિષ્ઠં લમ્બનાસિકમ્ ।
સિદ્ધિબુદ્ધ્યુભયાશ્લિષ્ટં પ્રસન્નવદનામ્બુજમ્ ॥
ઇતિ સંસર્ગઃ ॥ ૨॥

અથ છન્દોદૈવતમ્ । અનુષ્ટુપ્છન્દો ભવતિ દ્વાત્રિંશ-
દક્ષરાનુષ્ટુબ્ ભવતિ । અનુષ્ટુભા સર્વમિદં સૃષ્ટ-
મનુષ્ટુભા સર્વમુપસંહૃતમ્ । શિવોમાયુતઃ પરમાત્મા
વરદો દેવતા । તે હોચુઃ કથં શિવોમાયુત ઇતિ । સ હોવાચ
ભૃગુપુત્રઃ પ્રકૃતિપુરુષમયો હિ સ ધનદ ઇતિ પ્રકૃતિર્માયા
પુરુષઃ શિવ ઇતિ । સોઽયં વિશ્વાત્મા દેવતેતિ । તદેતન્નિદર્શનમ્
— ઇન્દ્રો માયાભિઃ પુરુહૂત ઈડે શર્વો વિશ્વં માયયા
સ્વિદ્ધાર । સોઽજઃ શેતે માયયા સ્વિદ્ગુહાયાં વિશ્વં ન્યસ્તં
વિષ્ણુરેકો વિજજ્ઞે ॥ તદેતન્માયા હંસમયી દેવાનામ્ ॥
સર્વેષાં વા એતદ્ભૂતાનામાકાશઃ પરાયણમ્ । સર્વાણિ હ
વા ઇમાનિ ભૂતાન્યાકાશાદેવ જાયન્તે જાતાનિ જીવન્ત્યાકાશં
પ્રયન્ત્યભિસંવિશન્તિ । તસ્માદાકાશબીજં શિવો વિદ્યાત્ ।
તદેતન્નિદર્શનમ્ — હંસઃ શુચિષદ્વસુરન્તરિક્ષસદ્ધોતા
વેદિષદતિથિર્દુરોણસત્ । નૃષાદ્વરસદૃતસદ્વ્યોમસદબ્જા
ગોજા ઋતજા અદ્રિજા ઋતં બૃહદિતિ ॥ ૩॥

અથાધિષ્ઠાનમ્ — મધ્યે બિન્દું ત્રિકોણં તદનુ ઋતુગણં
વસુદલં દ્વાદશારં ષોડશકર્ણિકેતિ । મધ્યે બીજાત્મકં
દેવં યજેત્ । વામદક્ષિણે સિદ્ધિર્બુદ્ધિઃ । અગ્રે કામદુઘા
ષટ્કોણે સુમુખાદયઃ ષડ્વિનાયકાઃ । વસુદલે વક્રતુણ્ડા-
દ્યષ્ટવિનાયકાઃ । દ્વાદશારે બટુકો વામનો મહાદશક-
મહોદરૌ સુભદ્રો માલી વરો રામ ઉમા શિવઃ સ્કન્દો નન્દી ।
તદ્વાહ્યેઽણિમાદિસિદ્ધયઃ । ષોડશારે દિક્પાલાઃ સાયુધા
ઇતિ ॥ ૪॥

અથ પ્રસારઃ — ય એતેન ચતુર્થીષુ પક્ષયોરુભયોરપિ ।
લક્ષં જુહુયાદપૂપાનાં તત્ક્ષણાદ્ધનદો ભવેત્ ॥

સિદ્ધૌદનં ત્રિમાસં તુ જુહ્વદગ્રાવનન્યધીઃ । તાવજ્જુહ્વ-
ત્પૃથુકાન્હિ સાક્ષાદ્વૈશ્રવણો ભવેત્ ॥ ઉચ્ચાટયેદ્વિભીતૈશ્ચ
મારયદ્વિષવૃક્ષજૈઃ । વશ્યાય પઙ્કજોર્વિદ્વાન્ધનાર્થી
મોદકૈર્હુનેત્ ॥ એવં જ્ઞાત્વા કૃતકર્મા ભવતિ કૃતકર્મા
ભવતીતિ ॥ ૫॥

ઇતિ ગણેશપૂર્વતાપિન્યુપનિષત્સુ દ્વિતીયોપનિષત્ ॥ ૨॥

---

અથ હોવાચ ભૃગુપુત્રસ્તન્ત્રં વિજિજ્ઞાસિતવ્યમિતિ । મૂલે
શૂન્યં વિજાનીયાત્ । શૂન્યં વૈ પરં બ્રહ્મ । તત્ર સતારં
સમાયં સામ ન્યસેત્ત્રિરેખં ભવતિ ત્રયો હીમે લોકાસ્ત્રયો હીમે
વેદાઃ । ઋગ્વૈ ભૂઃ સા માયા ભવતિ । યજુર્વૈ ભુવઃ સ શિવો
ભવતિ । સામ વૈ સ્વઃ સ હિરણ્યગર્ભો ભવતિ । ષટ્કોણં
ભવતિ ષડ્ હીમે લોકાઃ ષડ્ઢા ઋતવો ભવન્તિ । તત્ર
તારમાયારમામારવિશ્વેશધરણીક્રમાન્ન્યસેત્ । અષ્ટપત્રં
ભવત્યષ્ટાક્ષરા ગાયત્રી ભવતિ બ્રહ્મગાયત્રીં ન્યસેત્ ।
દ્વાદશપત્ર ભવતિ દ્વાદશાદિત્યા ભવન્તિ તે સ્વરા ભવન્તિ ।
સ્વરાન્ જ્ઞાત્વાદિત્યલોકમશ્નુતે । ષોડશપત્રં ભવતિ
ષોડશકલો વૈ પુરુષો વર્ણો હ વૈ પુરુષઃ સ લોકાધિષ્ઠિતો
ભવત્યનુષ્ટુબ્ વૈ પુરુષઃ ॥ ૧॥

સ હોવાચ ભૃગુપુત્ર એતમાનુષ્ટુભં મન્ત્રરાજં સાઙ્ગં
સ પ્રસૃતિકં સમાયં સાધિષ્ઠાનં સતન્ત્રં યો જાનાતિ સ
ભૂતિમાન્ ભવતિ સોઽમૃતત્વં ચ ગચ્છતિ સોઽમૃતત્વં ચ
ગચ્છતીતિ ॥ ૨॥

ઇતિ ગણેશપૂર્વતાપિન્યુપનિષત્સુ તૃતીયોપનિષત્ ॥ ૩॥

ઇત્યાથર્વણીયા ગણેશપૂર્વતાપિન્યુપનિષત્સમાપ્તા ॥

---

---

અથ ગણેશોત્તરતાપિન્યુપનિષત્ ॥

(વરદોત્તરતાપિની)

ૐ ॥ ઓમિત્યેકાક્ષરં બ્રહ્મેદં સર્વમ્ । તસ્યોપવ્યાખ્યાનમ્ ।

સર્વં ભૂતં ભવ્યં ભવિષ્યદિતિ સર્વમોઙ્કાર એવ ।
એતચ્ચાન્યચ્ચ ત્રિકાલાતીતં તદપ્યોઙ્કાર એવ । સર્વં
હ્યેતદ્ગણેશોઽયમાત્મા બ્રહ્મેતિ । સોઽયમાત્મા ચતુષ્પાત્ ।
જાગરિતસ્થાનો બહિઃપ્રજ્ઞઃ સપ્તાઙ્ગ એકોનવિંશતિમુખઃ
સ્થૂલભુગ્વૈશ્વાનરઃ પ્રથમઃ પાદઃ । સ્વપ્નસ્થાનોઽન્તઃ-
પ્રજ્ઞઃ સપ્તાઙ્ગ એકોનવિંશતિમુખઃ પ્રવિવિક્તભુક્ તૈજસો
દ્વિતીયઃ પાદઃ । યત્ર સુપ્તો ન કઞ્ચન કામં કામયતે ન
કઞ્ચન સ્વપ્નં પશ્યતિ તત્સુષુપ્તમ્ । સુષુપ્તિસ્થાન એકીભૂતઃ
પ્રજ્ઞાનઘન એવાનન્દભુક્ ચેતોમુખઃ પ્રાજ્ઞસ્તૃતીયઃ
પાદઃ । એષ સર્વેશ્વર એષ સર્વજ્ઞ એષોઽન્તર્યામ્યેષ યોનિઃ
સર્વસ્ય પ્રભવાપ્યયૌ હિ ભૂતાનામ્ । નાન્તઃપ્રજ્ઞં ન
બહિઃપ્રજ્ઞં નોભયતઃપ્રજ્ઞં ન પ્રજ્ઞં નાપ્રજ્ઞં

ન પ્રજ્ઞાનઘનમદૃષ્ટમવ્યવહાર્યમગ્રાહ્યમલક્ષણ-
મચિન્ત્યમવ્યપદેશ્યમૈકાત્મ્યપ્રત્યયસારં પ્રપઞ્ચોપશમં
શિવમદ્વૈતં ચતુર્થં મન્યન્તે સ ગણેશ આત્મા વિજ્ઞેયઃ ।
સદોજ્જ્વલો વિદ્યાતત્કાર્યહીનઃ સ્વાત્મબન્ધરહિતઃ સર્વદોષરહિત
આનન્દરૂપઃ સર્વાધિષ્ઠાનઃ સન્માત્રો નિરસ્તાવિદ્યાતમોમોહ-
મેવેતિ સમ્ભાવ્યાહમોં તત્સત્પરં બ્રહ્મ વિઘ્નરાજશ્ચિદાત્મકઃ
સોઽહમોં તદ્વિનાયકં પરં જ્યોતી રસોઽહમિત્યાત્માનમાદાય
મનસા બ્રહ્મણૈકીકુર્યાત્ । વિનાયકોઽહમિત્યેતત્તત્ત્વતઃ પ્રવદન્તિ
યે । ન તે સંસારિણો નૂનં પ્રમોદો વૈ ન સંશયઃ ॥ ઇત્યુપનિષત્ ।
ય એવં વેદ સ મુખ્યો ભવતીતિ યાજ્ઞવલ્ક્ય ઇતિ યાજ્ઞવલ્ક્ય ઇતિ ।
એતદેવ પરં ધ્યાનમેતદેવ પરં તપઃ । વિનાયકસ્ય યજ્જ્ઞાનં
પૂજનં ભવમોચનમ્ ॥ અશ્વમેધસહસ્રાણિ વાજપેયશતાનિ ચ ।
એકસ્ય ધ્યાનયોગસ્ય કલાં નાર્હન્તિ ષોડશીમ્ ॥
ઇતિ ગણેશોત્તરતાપિન્યુપનિષત્સુ પ્રથમોપનિષત્ ॥ ૧॥

---

ૐ ॥ સ વિષ્ણુઃ સ શિવઃ સ બ્રહ્મા સેન્દ્રઃ સેન્દુઃ સ સૂર્યઃ
સ વાયુઃ સોઽગ્નિઃ સ બ્રહ્માયમાત્મને સર્વદેવાય આત્મને
ભૂતાય આત્મન ઇતિ મન્યન્તે । ૐ સોઽહં ૐ સોઽહં ૐ
સોઽહમિતિ । ૐ બ્રહ્મન્ ૐ બ્રહ્મન્ ૐ બ્રહ્મન્નિતિ । ૐ શિવં

ૐ શિવં ૐ શિવમિતિ । તં ગણેશં તં ગણેશમિદં
શ્રેષ્ઠમ્ । ૐ ગણાનાં ત્વા ગણપતિઃ ।સપ્રિયાણાં ત્વા
પ્રિયપતિઃ । સનિધીનાં ત્વા નિધિપતિઃ । ૐ તત્પુરુષાય
વિદ્મહે વક્રતુણ્ડાય ધીમહિ । તન્નો દન્તી પ્રચોદયાત્ ।
ૐ તદ્ગણેશઃ । ૐ સદ્ગણેશઃ । ૐ પરં ગણેશઃ ।
ૐ બ્રહ્મ ગણેશઃ । ગણનાકારો નાદઃ । એતત્સર્વો નાદઃ ।
સર્વાકારો નાદઃ । એતદાકારો નાદઃ । મહાન્નાદઃ । સ
ગણેશો મહાન્ ભવતિ । સોઽણુર્ભવતિ । સ વન્દ્યો ભવતિ । સ
મુખ્યો ભવતિ । સ પૂજ્યો ભવતિ । રૂપવાન્ ભવતિ ।
અરૂપવાન્ ભાવતિ । દ્વૈતો ભવતિ । અદ્વૈતો ભવતિ ।
સ્થાવરસ્વરૂપવાન્ ભવતિ । જઙ્ગમસ્વરૂપવાન્ ભવતિ ।
સચેતનવિચેતનો ભવતિ । સર્વં ભવતિ । સ ગણેશોઽવ્યક્તો
યોઽણુર્યઃ શ્રેષ્ઠઃ સ વૈ વેગવત્તરઃ । અહ્રસ્વાહ્રસ્વશ્ચ ।
અતિહ્રસ્વાતિહ્રસ્વાતિહ્રસ્વશ્ચ । અસ્થૂલાસ્થૂલાસ્થૂલશ્ચ ।
ૐ ન વાયુર્નાગ્નિરાકાશો નાપઃ પૃથિવી ન ચ । ન
દૃશ્યં ન દૃશ્યં ન દૃશ્યમ્ । ન શીતં નોષ્ણં ન
વર્ષં ચ । ન પીતં ન પીતં ન પીતમ્ । ન શ્વેતં ન
શ્વેતં ન શ્વેતમ્ । ન રક્તં ન રક્તં ન રક્તમ્ । ન
કૃષ્ણં ન કૃષ્ણં ન કૃષ્ણમ્ । ન રૂપં ન નામ ન
ગુણમ્ ંઅ પ્રાપ્યં ગણેશં મન્યન્તે । સ શુદ્ધઃ સ
શુદ્ધઃ સ શુદ્ધો ગણેશઃ । સ બ્રહ્મ સ બ્રહ્મ સ બ્રહ્મ
ગણેશઃ । સ શિવઃ સ શિવઃ સ શિવો ગણેશઃ । ઇન્દ્રો ગણેશો
વિષ્ણુર્ગણેશઃ સૂર્યો ગણેશ એતત્સર્વં ગણેશઃ । સ નિર્ગુણઃ
સ નિરહઙ્કારઃ સ નિર્વિકલ્પઃ સ નિરીહઃ સ નિરાકાર આનન્દ-
રૂપસ્તેજોરૂપમનિર્વાચ્યમપ્રમેયઃ પુરાતનો ગણેશો નિગદ્યતે ।
સ આદ્યઃ સોઽક્ષરઃ સોઽનન્તઃ સોઽવ્યયો મહાન્પુરુષઃ ।
તચ્છુદ્ધં તચ્છબલં તતઃ પ્રકૃતિમહત્તત્ત્વાનિ જાયન્તે ।
તતશ્છાહઙ્કારાદિપઞ્ચતન્માત્રાણિ જાયન્તે । તતઃ
પૃથ્વ્યપ્તેજો વાય્વાકાશપઞ્ચમહદ્ભૂતાનિ જાયન્તે ।
પૃથિવ્યા ઓષધયઃ ઓષધીભ્યોમન્નાદ્રેતસ્તતઃ પુરુષસ્તતઃ
સર્વં તતઃ સર્વં તતઃ સર્વં તતઃ સર્વં જગત્ । સર્વાણિ
ભૂતાનિ જાયન્તે । દેવા નુ જાયન્તે । તતશ્ચ જીવન્તિ । દેવા

નુ જીવન્તિ । યજ્ઞા નુ જીવન્તિ । સર્વં જીવતિ । સ ગણેશ આત્મા
વિજ્ઞેયઃ । ઇત્યુપનિષત્ । ય એવં વેદ સ મુખ્યો ભવતીતિ
યાજ્ઞવલ્ક્ય ઇતિ યાજ્ઞવલ્ક્ય ઇતિ ॥

ઇતિ ગણેશોત્તરતાપિન્યુપનિષત્સુ દ્વિતીયોપનિષત્ ॥ ૨॥

---

ૐ ॥ ગણેશો વૈ બ્રહ્મ તદ્વિદ્યાત્ । યદિદં કિઞ્ચ સર્વં
ભૂતં ભવ્યં જાયમાનં ચ તત્સર્વમિત્યાચક્ષતે ।
અસ્માન્નાતઃ પરં કિઞ્ચિત્ । યો વૈ વેદ સ વેદ બ્રહ્મ
બ્રહ્મૈવોપાપ્નોતિ । તત્સર્વમિત્યાચક્ષતે । બ્રહ્મવિષ્ણ્વાદિ-
ગણાનામીશભૂતમિત્યાહ તદ્ગણેશ ઇતિ । તત્પરમિત્યાહ
યમેતે નાપ્નુવન્તિ પૃથિવી સુવર્ચા યુવતિઃ સજોષાઃ । યદ્વૈ
વાઙ્ નાક્રામતિ મનસા સહ નાગ્નિર્ન પૃથ્વી ન તેજો ન
વાયુર્ન વ્યોમ ન જલમિત્યાહ । નેન્દ્રિયં ન શરીરં ન નામ
ન રૂપમ્ । ન શુક્લં ન રક્તં ન પીતં ન કૃષ્ણમિતિ । ન
જાગ્રન્ન સ્વપ્નો ન સુષુપ્તિર્ન વૈ તુરીયા । તચ્છુદ્ધમપ્રા-
પ્યમપ્રાપ્યં ચ । અજ્ઞેયં ચાજ્ઞેયં ચ । વિકલ્પાસહિષ્ણુ
તત્સશક્તિકં ગજવક્ત્રં ગજાકારં જગદેવાવરુન્ધે ।

દિવમનન્તશીર્ષૈર્દિશમનન્તકરૈર્વ્યોમાનન્તજઠરૈર્મહી-
મનન્તપાદૈઃ સ્વતેજસા બાહ્યાન્તરીયાન્વ્યાપ્ય તિષ્ઠતીત્યાહ ।
તદ્વૈ પરં બ્રહ્મ ગણેશ ઇત્યાત્માનં મન્યન્તે । તદ્વૈ
સર્વતઃ પશ્યતિ સ્મ ન કિઞ્ચિદ્દદર્શ । તતો વૈ સોઽહમભૂત્ ।
નૈકાકિતા યુક્તેતિ ગુણાન્નિર્મમે । નામે રજઃ સ વૈ બ્રહ્મા ।
મુખાત્સત્ત્વં સ વૈ વિષ્ણુઃ । નયનાત્તમઃ સ વૈ હરઃ ।
બ્રહ્માણમુપદિશતિ સ્મ બ્રહ્મન્ કુરુ સૃષ્ટિમ્ । બ્રહ્મોવાચ
નાહં વેદ્મિ । ગણેશ ઉવાચ મદ્દેહે બ્રહ્માણ્ડાન્તર્ગતં
વિલોકય તથાવિધામેવ કુરુ સૃષ્ટિમ્ ।
અથ બ્રહ્મા જન્મદ્વારેણ બ્રહ્માણ્ડાન્તર્ગતં વિલોકયતિ સ્મ ।
સમુદ્રાન્ સરિતઃ પર્વતાન્ વનાનિ  મહીં દિવં પાતાલં ચ
નરાન્ પશૂન્મૃગાન્નાગાન્ હયાન્ ગોવ્રજાન્ સૂર્યાચન્દ્રમસો
નક્ષત્રાણ્યગ્નીન્ વાયુન્દિશસ્તતો વ સૃષ્ટિમચીકરત્ ।

તતશ્ચાત્માનમિતિ મન્યતે સ્મ । ન વૈ મત્તઃ પરં
કિઞ્ચિદહમેવ સર્વસ્યેશ ઇતિ યાવદ્વદતિ તાવત્ક્રૂરા અજાયેરન્ ।
મહદ્દેહા જિહ્વયા ભુવં લિહાના દંષ્ટ્રાવ્યાપ્તાકાશા
મહચ્છબ્દા બ્રહ્માણં હન્તુમુદ્યુક્તાઃ । તાન્દૃષ્ટ્વા-
બિભ્યત્તત્સસ્માર । તતશ્ચાગ્રે કોટિસૂર્યપ્રતીકાશમાનન્દરૂપં
ગજવક્ત્રં વિલોકયતિ સ્મ । તુષ્ટાવાથ ગણેશ્વરમ્ । ત્વં
નિર્માતા ક્ષ્માભૃતાં સરિતાં સાગરાણાં સ્થાવરાણાં
જઙ્ગમાનાં ચ । ત્વત્તઃ પરતરં કિઞ્ચિન્નૈવાસ્તિ જગતઃ
પ્રભો । કર્તા સર્વસ્ય વિશ્વસ્ય પાતસંહારકારકઃ ।
ભવાનિદં જગત્સર્વં વ્યાપ્યૈવ પરિતિષ્ઠતિ ॥ ઇતિ સ્તુત્વા
બ્રહ્માણં તદુવાચ બ્રહ્મસ્તપસ્વ તપસ્વેત્યુક્ત્વાઽન્તર્હિતે
અસ્મિન્ બ્રહ્મા તપશ્ચચાર । કિયત્સ્વતીતેષ્વનેહઃસુ તપસિ
સ્થિતે બ્રહ્મણિ પુરો ભૂત્વોવાચ । પ્રસન્નોઽહં પ્રસન્નોઽહં
વરાન્ વરય । શ્રુત્વૈવં વચોન્મીલ્ય નયને યાવત્પુરઃ પશ્યતિ
તાવદ્ગણેશં દદર્શ । સ્તૌતિ સ્મ । ત્વં બ્રહ્મા ત્વં
વિષ્ણુસ્ત્વં હરસ્ત્વં પ્રજાપતિસ્ત્વમિન્દ્રસ્ત્વં સૂર્યસ્ત્વં
સોમસ્ત્વં ગણેશઃ । ત્વયા વ્યાપ્તં ચરાચરં ત્વદૃતે ન
હિ કિઞ્ચન । તતશ્ચ ગણેશ ઉવાચ । ત્વં ચાહં ચ ન વૈ
ભિન્નૌ કુરુ સૃષ્ટિં પ્રજાપતે । શક્તિં ગૃહાણ મદ્દત્તાં
જગત્સર્જનકર્મણિ ॥ તતો વૈ ગૃહીતાયાં શત્વા બ્રહ્મણઃ
સૃષ્ટિરજાયત । બ્રાહ્મણો વૈ મુખાજ્જજ્ઞે બાહ્વોઃ
ક્ષત્રમૂર્વોર્વૈશ્યઃ પદ્ભ્યાં શૂદ્રશ્ચક્ષુષો વૈ સૂર્યો
મનશ્ચન્દ્રમા અગ્નિર્વૈ મુખાત્પ્રાણાદ્વાયુર્નાભેર્વ્યોમ
શીષ્ર્ણો દ્યૌઃ પદ્ભ્યાં ભૂમિર્દિશઃ શ્રોત્રાત્ । તથા
લોકાનકલ્પયન્નિતિ । તતો વૈ સત્ત્વમુવાચ ત્વં વૈ વિષ્ણુઃ પાહિ
પાહિ જગત્સર્વમ્ । વિષ્ણુરુવાચ ન મે શક્તિઃ । સોવાચ
ગૃહાનેમાં વિદ્યામ્ । તતો વૈ સત્ત્વં તામાદાય જગત્પાતિ સ્મ ।
હરમુવાચ કુરુ હર સંહારમ્ । જગદ્ધરણાદ્ધરો ભવ ।
હરશ્ચાત્માનમિત્યવૈતિ સ્મ ન વૈ મત્પરં કિઞ્ચિદ્વિશ્વસ્યાદિ-
રહં હર ઇતિ ગર્વં દધૌ યાવત્તાવદ્વ્યાપ્તં વ્યોમ ગજવક્ત્રૈ-
ર્મહચ્છબ્દૈર્હરં હર્તુમુદ્યુક્તૈઃ । હરો વૈ વિલોક્ય રુદતિ સ્મ ।
રોદનાદ્રુદ્રસઙ્જ્ઞઃ । તતસ્તં પુરુષં સ્મૃત્વા તુષ્ટાવ

ત્વં બ્રહ્મા ત્વં કર્તા ત્વં પ્રધાનં ત્વં લોકાન્ સૃજસિ
રક્ષસિ હરસિ । વિશ્વાધારસ્ત્વમનાધારોઽનાધેયોઽનિર્દેશ્યો-
ઽપ્રતર્ક્યો વ્યાપ્યેદં સર્વં તિષ્ઠસીતિ સ્તવનાદ્વિનાયકં
દદર્શ । તતશ્ચ તં નનામ । ગણેશ ઉવાચ કુરુ હર
હરણમ્ । તદ્વૈ સંહર્તાઽભૂદ્રુદ્રઃ । ય એવં વેદ સ ગણેશો
ભવતિ । ઇત્યુપનિષત્ ॥

ઇતિ ગણેશોત્તરતાપિન્યુપનિષત્સુ તૃતીયોપનિષત્ ॥ ૩॥

---

ॐ ॥ ગણેશો વૈ સદજાયત તદ્વૈ પરં બ્રહ્મ । તદ્વિદાપ્નોતિ
પરમ્ । તદેષાભ્યુક્તા યદનાદિભૂતં યદનન્તરૂપં
યદ્વિજ્ઞાનરૂપં યદ્દેવાઃ સર્વે બ્રહ્મ જ્યેષ્ઠમુપાસતે ન
વૈ કાર્યં કરણં ન તત્સમશ્ચાધિકશ્ચ દૃશ્યઃ ।
સૂર્યોઽસ્માદ્ભીત ઉદેતિ । વાતોઽસ્માદ્ભીતઃ પવતે । અગ્નિર્વૈ
ભીતસ્તિષ્ઠતિ । તચ્ચિત્સ્વરૂપં નિર્વિકારમદ્વૈતં ચ ।
તન્માયાશબલમજનીત્યાહ । અનેન યથા તમસ્તતશ્ચોમિતિ
ધ્વનિરભૂત્ । સ વૈ ગજાકારઃ । અનિર્વચનીયા સૈવ માયા
જગદ્બીજમિત્યાહ । સૈવ પ્રકૃતિરિતિ ગણેશ ઇતિ પ્રધાનમિતિ ચ
માયાશબલમિતિ ચ । એતસ્માદ્વૈ મહત્તત્ત્વમજાયત । તતઃ
કરાગ્રેણાહઙ્કારં સૃષ્ટવાન્ । સ વૈ ત્રિવિધઃ સાત્ત્વિકો
રાજસતામસશ્ચેતિ । સાત્ત્વિકી જ્ઞાનશક્તિઃ । રાજસી
ક્રિયાશક્તિઃ । તામસી દ્રવ્યશક્તિઃ । તામસ્યાઃ પઞ્ચ-
તન્માત્રા અજાયન્ત પઞ્ચભૂતાન્યજાયન્ત । રાજસ્યાઃ
પઞ્ચ જ્ઞાનેન્દ્રિયાણિ પઞ્ચ કર્મેન્દ્રિયાણિ પઞ્ચ
વાયવશ્ચાજાયન્ત । સાત્ત્વિક્યા દિશો વાયુઃ સૂર્યો
વરુણોઽશ્વિનાવિતિ જ્ઞાનેન્દ્રિયદેવતા અગ્નિરિન્દ્રો વિષ્ણુઃ
પ્રજાપતિર્મિત્ર ઇતિ કર્મેન્દ્રિયદેવતાઃ । ઇદમાદિપુરુષરૂપમ્ ।
પરમાત્મનઃ સૂક્ષ્મશરીરમિદમેવોચ્યતે । અથ દ્વિતીયમ્ ।
પઞ્ચતન્માત્રાઃ પઞ્ચસૂક્ષ્મભૂતાન્યુપાદાય
પઞ્ચીકરણે કૃતે પઞ્ચમહાભૂતાન્યજાયન્ત ।
અવશિષ્ટાનાં પઞ્ચપઞ્ચાશાનાં કલ્પારમ્ભસમયે
ભૂતવિભાગે ચૈતન્યપ્રવેશાદહમિત્યભિમાનઃ ।

તસ્માદાદિગણેશો ભવાનુચ્યતે । તતો વૈ ભૂતેભ્યશ્ચતુર્દશ
લોક અજાયેરન્ । તદન્તર્ગતજીવરાશયઃ સ્થૂલશરીરૈઃ સહ
વિરાડિત્યુચ્યતે । ઇતિ દ્વિતીયમ્ । રાજસો બ્રહ્મા સાત્ત્વિકો
વિષ્ણુસ્તામસો વૈ હરઃ । ત્રયં મિલિત્વા પરસ્પરમુવાચ
અહમેવ સર્વસ્યેશ ઇતિ । તતો વૈ પરસ્પરમસહમાનાશ્ચોર્ધ્વં
જગ્મુઃ । તત્ર ન કિઞ્ચિદ્દદૃશુઃ । તતશ્ચાધઃપ્રદેશે
દશદિક્ષુ ભ્રમન્તો ન કિઞ્ચિત્પશ્યન્તિ સ્મ । તતો વૈ
ધ્યાનસ્થિતા અભૂવન્ । તતશ્ચ હૃદ્દેશે મહાન્તં
પુરુષં ગજવક્ત્રમસઙ્ખ્યશીર્ષમસઙ્ખ્યપાદ-
મનન્તકરં તેજસા વ્યાપ્તાખિલલોકં બ્રહ્મમૂર્ધાનં
દિક્શ્રવણં બ્રહ્માણ્ડગણ્ડં ચિદ્વ્યોમતાલુકં સત્યજનનં
ચ જગદુત્પત્ત્યપાયોન્મેષનિમેષં સોમાર્કાગ્નિનેત્રં
પર્વતેશરદં પુણ્યાપુણ્યોષ્ઠં ગ્રહોડુદશનં
ભારતીજિહ્વં શક્રઘ્રાણં કુલગોત્રાંસં સોમેન કણ્ઠં
હરશિરોરુહં સરિન્નદભુજમુરગાઙ્ગુલિકમૃક્ષનખં
શ્રીહૃત્કામાકાશનાભિકં સાગરોદરં મહીકટિદેશં
સૃષ્ટિલિઙ્ગકં પર્વતેશોરું દસ્રજાનુકં જઠરાન્તઃ-
સ્થિતયક્ષગન્ધર્વરક્ષઃકિન્નરમાનુષં પાતાલજઙ્ઘકં
મુનિચરણં કાલાઙ્ગુષ્ઠકં તારકાજાલલાઙ્ગુલં
દૃષ્ટ્વા સ્તુવન્તિ સ્મ । યતો વા ઇમાનિ ભૂતાનિ જાયન્તે
યતોઽગ્નિઃ પૃથિવ્યપ્તેજો વાયુર્યત્કરાગ્રાદ્બ્રહ્મવિષ્ણુરુદ્રા
અજાયન્ત યતો વૈ સમુદ્રાઃ સરિતઃ પર્વતાશ્ચ યતો વૈ
ચરાચરમિતિ સ્તવનાત્પ્રસન્નો ભૂત્વોવાચાઽહં સર્વસ્યેશો
મત્તઃ સર્વાણિ ભૂતાનિ મત્તઃ સર્વં ચરાચરં ભવન્તો
વૈ ન મદ્ભિન્ના ગુણા મે વૈ ન સંશયઃ । ગુણેશં માં
હૃદિ સઞ્ચિન્ત્ય રાજસ ત્વં જગત્કુરુ સાત્વિક ત્વં પાલય
તામસ ત્વં હરેત્યુક્ત્વાન્તર્હિતઃ । સ વૈ ગણેશઃ । સર્વાત્મા
વિજ્ઞેયઃ સર્વદેવાત્મા વૈ સ એકઃ । ય એવં વેદ સ ગણેશો
ભવતિ । ઇત્યુપનિષત્ ।

ઇતિ ગણેશોત્તરતાપિન્યુપનિષત્સુ ચતુર્થોપનિષત્ ॥ ૪॥

ૐ ॥ દેવા હ વૈ રુદ્રમબ્રુવન્ કથમેતસ્યોપાસનમ્ । સ
હોવાચ રુદ્રો ગણકો નિચૃદ્ગાયત્રી શ્રીગણપતેરેનં
મન્ત્રરાજમન્યોન્યાભાવાત્પ્રણવસ્વરૂપસ્યાસ્ય પરમાત્મ-
નોઽઙ્ગાનિ જાનીતે સ જાનાતિ સોઽમૃતત્વં ચ ગચ્છતિ ।
યોઽધીતે સ સર્વં તરતિ । ય એનં મન્ત્રરાજં ગણપતેઃ
સર્વદં નિત્યં જપતિ સોઽગ્નિં સ્તમ્ભયતિ સ ઉદકં
સ્તમ્ભયતિ સ વાયું સ્તમ્ભયતિ સ સૂર્યં સ્તમ્ભયતિ સ
સર્વાન્દેવાન્સ્તમ્ભયતિ સ વિષં સ્તમ્ભયતિ સ સર્વોપદ્રવા-
ન્સ્તમ્ભયતિ । ઇત્યુપનિષત્ । ય એનં મન્ત્રરાજં નિત્યમધીતે
સ વિઘ્નાનાકર્ષયતિ દેવાન્યક્ષાન્ રોગાન્ ગ્રહાન્મનુષ્યાન્
સર્વાનાકર્ષયતિ । સ ભૂર્લોકં જયતિ સ ભુવર્લોકં જયતિ
સ સ્વર્લોકં સ મહર્લોકં સ જનોલોકં સ તપોલોકં સ
સત્યલોકં સ સપ્તલોકં સ સર્વલોકં જયતિ । સોઽગ્નિષ્ટોમેન
યજતે સોઽત્યગ્નિષ્ટોમેન સ ઉક્થ્યેન સ ષોડશીયેન સ
વાજપેયેન સોઽતિરાત્રેણ સોઽપ્તોર્યામેણ સ સર્વૈઃ
ક્રતુભિર્યજતે । ય એનં મન્ત્રરાજં વૈઘ્નરાજં
નિત્યમધીતે સ ઋચોઽધીતે સ યજૂંષ્યધીતે સ
સામાન્યધીતે સોઽથર્વણમધીતે સોઽઙ્ગિરસમધીતે સ
શાખા અધીતે સ પુરાણાન્યધીતે સ કલ્પાનધીતે સ ગાથા
અધીતે સ નારાશંસીરધીતે સ પ્રણવમધીતે । ય એનં
મન્ત્રરાજં ગાણેશં વેદ સ સર્વં વેદ સ સર્વં વેદ ।
સ વેદસમઃ સ મુનિસમઃ સ નાગસમઃ સ સૂર્યસમઃ
સોઽગ્નિસમ ઇતિ । ઉપનીતૈકાધિકશતં ગૃહસ્થૈકાધિકશતં
વાનપ્રસ્થકાધિકશતં રુદ્રજાપકસમમ્ ।
યતીનામેકાધિકશતમથર્વશિરઃશિખાધ્યાપકસમમ્ ।
રુદ્રજાપકૈકાધિકશતમથર્વશિરઃશિખાધ્યાપકૈકાધિકશતં
ગાણેશતાપનીયોપનિષદધ્યાપકસમમ્ । મન્ત્રરાજજાપકસ્ય
યત્ર રવિસોમૌ ન તપતો યત્ર વાયુર્નક્ષત્રાણિ ન વાતિ
ભાન્તિ યત્રાગ્નિર્મૃત્યુર્ન દહતિ પ્રવિશતિ યત્ર મોહો ન
દુઃખં સદાનન્દં પરાનન્દં સમં શાશ્વતં
સદાશિવં પરં બ્રહ્માદિવન્દિતં યોગિધ્યેયં પરમં
પદં ચિન્માત્રં બ્રહ્મણસ્પતિમેકાક્ષરમેવં

પરમાત્માનં બાહ્યાન્તે લબ્ધાંશં હૃદિ સમાવેશ્ય
કિઞ્ચિજ્જપ્ત્વા તતો ન જપો ન માલા નાસનં ન
ધ્યાનાવાહનાદિ । સ્વયમવતીર્ણો હ્યયમાત્મા બ્રહ્મ
સોઽહમાત્મા ચતુષ્પાત્ । બહિઃપ્રજ્ઞઃ પ્રવિવિક્તભુક્
તૈજસઃ । યત્ર સુપ્તો ન કઞ્ચન કામં કામયતે ન
કઞ્ચન સ્વપ્નં પશ્યતિ તત્સુષુપ્તમ્ । તત્રૈકીભૂતઃ
પ્રજ્ઞાનઘન એવાનન્દભુક્ ચેતોમુખઃ પ્રાજ્ઞઃ । એષ
સર્વેશ્વરઃ સર્વાન્તર્યામી એષ યોનિઃ સર્વભૂતાનામ્ । ન
બહિઃપ્રજ્ઞં નાન્તઃપ્રજ્ઞં નોભયતઃપ્રજ્ઞં ન
પ્રજ્ઞાનઘનમવ્યપદેશ્યમવ્યવહાર્યમગ્રાહ્યમલક્ષણ-
મચિન્ત્યમૈકાત્મ્યપ્રત્યયસારં પ્રપઞ્ચોપશમં
શિવમદ્વૈતમેવં ચતુષ્પાદં ધ્યાયન્ સ એવાત્મા
ભવતિ । સ આત્મા વિજ્ઞેયઃ સદોજ્જ્વલોઽવિદ્યાતત્કાર્યહીનઃ
સ્વાત્મબન્ધરહિતો દ્વૈતરહિતો નિરસ્તાવિદ્યાતમોમોહા-
હઙ્કારપ્રધાનમહમેવ સર્વમિતિ સમ્ભાવ્ય વિઘ્નરાજ-
બ્રહ્મણ્યમૃતે તેજોમયે પરઞ્જ્યોતિર્મયે સદાનન્દમયે
સ્વપ્રકાશે સદોદિતે નિત્યે શુદ્ધે મુક્તે ક્ષેશ્વરે પરે બ્રહ્મણિ
રમતે રમતે રમતે રમતે । ય એવં ગણેશતાપની-
યોપનિષદં વેદ સ સંસારં તરતિ ઘોરં તરતિ દુઃખં
તરતિ વિઘ્નાંસ્તરતિ મહોપસર્ગં તરતિ । આનન્દો ભવતિ સ
નિત્યો ભવતિ સ શુદ્ધો ભવતિ સ મુક્તો ભવતિ સ સ્વપ્રકાશો
ભવતિ સ ઈશ્વરો ભવતિ સ મુખ્યો ભવતિ સ વૈશ્વાનરો
ભવતિ સ તૈજસો ભવતિ સ પ્રાજ્ઞો ભવતિ સ સાક્ષી ભવતિ
સ એવ ભવતિ સ સર્વો ભવતિ સ સર્વો ભવતીતિ । ઇત્યુપનિષત્ ।
ૐ સ હ નાવવતુ ॥

ઇતિ ગણેશોત્તરતાપિન્યુપનિષત્સુ પઞ્ચમોપનિષત્ ॥ ૫॥

---

ૐ ॥ અથોવાચ ભગવતી ગૌરી હ વૈ રુદ્રમેતસ્ય
મન્ત્રરાજસ્યાનુષ્ઠાનવિધિં મે બ્રૂહીતિ । સ હોવાચ
રુદ્રો વિધિં લબ્ધાંશં ગુરુદેવતયોરાલભ્ય મનસા
પુષ્પં નિવેદ્યોપક્રમ્ય ભૂતોત્સારણમાસનબન્ધાદ્યાત્મ-

રક્ષાસુનિયમભૂતશુદ્ધિપ્રાણસ્થાપનપ્રણવાવર્તન-
માતૃપૂજનાન્તર્માતૃકાન્તર્યાગાદિ સમ્પાદ્યાત્ર
કેચન સમન્ત્રં મૂલવૈદિકકલ્પરુપક્રમં ગ્રહણ-
સમર્પણનિવેદનાનિ બાહ્યેઽન્યથેતિ મહાર્થ્યં શઙ્ખં
ત્રિપાદ્યોર્ગન્ધાદિના પૂજિતયોઃ સ્થાપ્ય પાત્રાસાદનં
દક્ષિણોપક્રમેણ પાદ્યાર્ઘ્યાચમનમધુપર્કપુન-
રાચમનનિવેદનપાત્રાણિ સંસ્થાસુ યથોપદિષ્ટે
ચતુર્થ્યોઃ પર્વણિ સંસ્થાસુ યથાવિધિ સ્થાપ્ય નિવેદને
પ્રક્ષાલનમેવ તતોઽર્વાક્ પઞ્ચામૃતપાત્રાણિ રિક્તં
ચ મૂલેનાલભ્ય નિવેદિનાર્ઘ્યોદકેનાત્માનં પાત્રાણિ
સમ્ભારં ચ પ્રોક્ષ્ય પાત્રાતિરિક્તાનિ મહાર્ઘ્યોદકેન
સર્વનિવેદનં કરશુદ્ધિં મૂલાસુનિયમં યથોક્તર્ષિ-
ચ્છન્દોદૈવતં સ્મૃત્વા વિનિયોગશ્ચ નિત્યે પૂજાઙ્ગો
જપો જપાઙ્ગા પૂજા જપ ઇત્યઙ્ગુષ્ઠવ્યાપકસ્યાન્તા-
ષ્ટાઙ્ગદણ્ડિમુણ્ડિન્યાસાદિ કૃત્વા મુખમવેક્ષ્યા-
ત્માનં દેવરૂપિણં સમ્ભાવ્ય મૂર્ધ્નિ પુષ્પં દત્ત્વા
પીઠં સમ્પૂજ્યાસનં દત્ત્વા ઋષ્યાદિ કૃત્વા ધ્યાત્વા
હૃદયામ્ભોજે યોગિનોઽત્ર જપન્તિ । સ્વાન્તામ્ભોજાદ્દેવ-
માવાહ્ય મુદ્રાં દર્શયિત્વા દેવસ્ય સકલીકરણાઙ્ગુ-
ષ્ઠહૃદયાર્પિન્યા સ્વાન્તે મુદ્રાં નિવેદ્ય પાત્રાણિ ચ
મૂલેન દત્ત્વા રિક્તે પઞ્ચામૃતં સંયોજ્ય તેન
પઞ્ચવારં સકૃદ્વાઽભિષિચ્ય નિત્યેન સન્તર્પ્ય
કલ્પસ્તવનાદિપુરુષસૂક્તરુદ્રાધ્યાયઘોષશાન્ત્યાદિના
મૂલેન ચાભિષિચ્ય સર્વપૂજાં નિવેદ્ય દીપં ત્રિર્ભ્રામ્ય
સવ્યેનાપ્લાવ્ય મહાનૈવેદ્યપીઠાવરણાન્યુપસંહૃત્ય
દર્શયેત્ । તામ્બૂલાન્તે કિઞ્ચિન્મૂલમાવર્ત્ય પુનર્ધૂ-
પાદિત્રયભક્ષ્યાદિ નિવેદ્ય મુદ્રાઃ સર્વોપચારસ્ય
દર્શયિત્વા નિવેદનમિદમાસનં નમઃ પાદ્યે એષોઽર્ઘ્યઃ
સ્વાહેતિ દક્ષિણકરેઽર્ઘ્યે ઇદં સ્વધેતિ પુરસ્ત્રિકે મુખે નમ
ઇતિ સ્નાનેષ્વેષ ગન્ધો નમોઽક્ષતેષુ ૐ પુષ્પાણિ નમઃ
પુષ્પેષ્વેષ ધૂપો દીપો નમો ધૂપદીપયોઃ સમર્પયામીતિ
નૈવેદ્યફલતામ્બૂલેષુ નિવેદયામિ નમો હિરણ્યે એષ

પુષ્પાઞ્જલિર્નમ ઇતિ માલાયામિતિ પરમં રહસ્યમપ્ર-
કાશ્યં બીજં ય એવં વેદ સ સર્વં વેદ સ સર્વં વેદ ।
વર્ણાર્થં લબ્ધાંશેન મન્ત્રાર્થેન ચ પીઠાવરણ-
દેવતાવધાનેન વા જપતિ સ જપતિ । મુખ્યં લબ્ધાંશ-
માસનં મૃદુલં ભુક્તરિક્તવાસઃકૌસુમ્ભમાઞ્જિષ્ઠ-
રક્તકમ્બલચિત્રમૃગવ્યાઘ્રાજિનં વા યથોક્તમુક્તાન્યતરૈ
રાસનાન્તરયોજનાસ્ફટિકકમલભદ્રાક્ષમણિમુક્તા-
પ્રવાલરુદ્રાક્ષકુશગ્રન્થિષુ વા જપતિ સ જપતિ ।
કુશમયી નિત્યાક્ષાલનં ચન્દનાલેપો ધૂપેનાભિમન્ત્રય
પૃથગભિમન્ત્રણં સદ્યોજાતૈઃ પઞ્ચભિઃ પ્રાણ-
સ્થાપનજીવનતર્પણગુપ્તાનિ ચ સ્વમૂલે ગુહ્યં વામેન
સ્પૃશેન્ન દર્શયેત્ । એવં શ્રાવણે પવિત્રેણ મધૌ
દમનેન જપમાલયા મહાનવમ્યાં તાપસ્યાં ચતુર્થ્યાં
તિલલડ્ડુકૈઃ સપ્તમ્યાં શીતલચન્દનેન શિવરાત્ર્યાં
બિલ્વદલમાલયાઽન્યસ્મિપર્વણિ મહત્યાર્ચયન્તિ તેઽર્ચયન્તિ ।
મોદકપૃથુકલાજસક્તુરમ્ભાફલેક્ષુનારીકેલા-
પૂપાનન્યાનિ ચ યથોપદિષ્ટમાહુતિભિર્જુહોતિ । જપશ્ચ
પ્રાક્પ્રવણે હોમોઽન્યથોપાસ્યઃ । એવં યઃ કરોતિ
સોઽમૃતત્વં વિન્દતિ સ પ્રતિષ્ઠાં પ્રાપ્નોતિ મુક્તિં વિન્દતિ
ભુક્તિં ભુનક્તિ વાચં વદતિ યશો લભતે । ઇદં રહસ્યં
યો જાનાતિ સ જાનાતિ યોઽધીતે સોઽધીતે સ આનન્દો ભવતિ સ
નિત્યો ભવતિ સ વિશુદ્ધો ભવતિ સ મુક્તો ભવતિ સ પ્રકાશો
ભવતિ સ દયાવાન્ભવતિ જ્ઞાનવાન્ભવત્યાનન્દવાન્ભવતિ
વિજ્ઞાનવાન્ભવતિ વિજ્ઞાનાનન્દો ભવતિ સોઽમૃતત્વં-
ભવત્યમૃતત્વં ભવતીતિ ।

ૐ સ હ નાવવત્વિતિ શાન્તિઃ ॥

ઇતિ ગણેશોત્તરતાપિન્યુપનિષત્સુ ષષ્ઠોપનિષત્ ॥ ૬॥

ઇત્યાથર્વણીયા ગણેશતાપિન્યુપનિષત્સમાપ્તા ॥

Encoded and proofread by Sunder Hattangadi

*Ganeshatapini Upanishad Purva and Uttara parts*

pdf was typeset on May 11, 2025

Please send corrections to *sanskrit@cheerful.com*